# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा नवम्बर/दिसम्बर् - २०१६

कक्षा- आचार्यः - १ (Sem – 1) **प्रश्नपत्रम् - २** गुणाः - ७०

विषयः - वेदः **कोड - CC - 4.1.1** समयः- ३:०० तः ६:००

दिनाङ्कः – ०६-१२-२०१६ सन्दर्भग्रन्थः - माध्यन्दिनसंहिता

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः १ कस्यचिदेकस्य भाष्यानुसारिव्याख्या विधीयताम्** (४)

(अ) परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।
दधद्रत्नानि दाशुषे ॥

(आ) अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः ।
तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः ॥

**प्रश्नः २ द्वयोः किमपि एकम् उत्तरयत** (१२)

(क) माध्यन्दिन-संहितायाः एकादशस्यस्य अध्यायस्य विषयानुपस्थापयत।

(ख) एकादशाध्यायस्य (माध्यन्दिनसंहितायाः) मन्त्रेषु पठिताभ्रिग्रहणं तस्य स्वरूपं च वर्णयत।

**प्रश्नः ३ केषाञ्चित् चतुर्णामेव शब्दानां अर्थः भाष्यदिशा लेखनीयः।** (४)

(क) श्लोकः (घ) जिष्णु

(ख) केतपूः (ङ) वृत्रहणं

(ग) पुरीष्यम् (च) स्वौपशा

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः ४ एकस्य मन्त्रस्य महीधरभाष्यानुसारं व्याख्या विधेया।** (४)

(अ) अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन् ।
सद्यो जज्ञानो वि हीमिद्धो अख्यदारोदसी भानुना भात्यन्तः ॥

(आ) पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः।
घृतेन त्वं तन्वं वर्धयस्वसत्याः सन्तु यजमानस्य कामाः ॥

**प्रश्नः ५ द्वयोः किमपि एकम् उत्तरयत।** (१२)

(क) चितौ चीयमानेष्टकासु पञ्चानां नामानि विलिख्य द्वादशाध्यायस्य कस्यचिदपि एकस्य चितेः स्वरूपमुपवर्णयत।

(ख) माध्यन्दिनसंहितायाः द्वादशाध्याये अग्नेः स्वरूपं किं दत्तमस्ति उपस्थापयत।

**प्रश्नः ६ केषाञ्चित् चतृणामेव शब्दानां अर्थः भाष्यदिशा लेखनीयः।** **(४)**

(क) नक्तोषासा। (घ) रुक्म।

(ख) इषायुषा। (ङ) रयिम्

(ग) विभावसुः (च) श्रुष्टिः

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः ७ द्वयोः किमपि एकम् उत्तरयत।** **(८)**

(अ) आचार्यस्य महीधरस्य परिचयमुपस्थापयत।

(आ) माध्यन्दिनसंहितायाः त्रयोदशाध्याये वर्णितदेवेष्वन्यतमस्य स्वरूपं लिखत।

**प्रश्नः ८ कस्यापि एकस्य मन्त्रस्य भाष्यदिशा व्याख्या विधेया।** **(४)**

(क) उच्छ्ष्मा ओषधीनां गावो गोष्ठादिवेरते।
धनं सनिष्यन्तीनामात्मानं तव पूरुष॥

(ख) हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥

**प्रश्नः ९ केषाञ्चित् त्रयाणां शब्दानां महीधरभाष्यालोके अर्थः प्रतिपादनीयः।** **(३)**

(क) यातुधाना: (घ) विश्वकर्मणा

(ख) सप्तहोत्रा: (ङ) ऋतायते

(ग) अघशंसः

चतुर्थी अन्वितिः (युनिट – ४)

**प्रश्नः १० द्वयोः कस्या अपि एकस्याः कण्डिकायाः व्याख्या महीधरभाष्यच्छायायां विधीयताम्** **(४)**

(क) पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः।
स्तोमपृष्ठा घृतवतीह सीदप्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादयतामिह त्वा॥

(ख) आयुर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि वाचं मे पिन्व मनो मे जिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ।

**प्रश्नः ११ द्वयोः किमपि एकम् उत्तरयत** **(८)**

(क) माध्यन्दिन-संहितायाः चतुर्दशाध्यायगतेषु देवेषु कस्यचिदेकस्य देवस्य स्वरूपं तदध्यायगतानां मन्त्राणामाधारेण प्रतिपादयत।

(ख) द्वितीयाचितेः वर्णनं कृत्वा 'कुलायिनी घृतवती पुरन्धिः' इति मन्त्रस्य भावार्थो लेख्यः।

**प्रश्नः १२ केषाञ्चित् त्रयाणामेव शब्दानां भावः भाष्यदिशा लेखनीयः।** **(३)**

(क) ध्रुवक्षितिः (ग) स्तोमपृष्ठा (घ) पाहि

(ख) पुरन्धिः (ङ) नाकः

*********